# 24 - चतुर्विंश दशकम्

# प्रह्लाद चरितं

हिरण्याक्षे पोत्रि प्रवर वपुषा देव भवता
हते शोक क्रोध ग्लपित धृति रेतस्य सहजः ।
हिरण्य प्रारम्भः कशिपु रमराराति सदसि
प्रतिज्ञा मातेने तव किल वधार्थं मधुरिपो ॥ ॥24-1॥

विधातारं घोरं स खलु तपसित्वा नचिरतः
पुरस् साक्षात् कुर्वन् सुर नर मृगाद्यै रनिधनम् ।
वरं लब्ध्वा दृप्तो जगदिह भवन् नायक मिदं
परिक्षुन्दन् इन्द्रा दहरत दिवं त्वामगणयन् ॥ ॥24-2॥

निहन्तुं त्वां भूयः तव पद मवाप्तस्य च रिपोः
बहिर् दृष्टे रन्तर् दधिथ हृदये सूक्ष्म वपुषा ।
नदन् उच्चैस् तत्रा प्यखिल भुवनान्ते च मृगयन्
भिया यातं मत्वा स खलु जितकाशी निववृते ॥ ॥24-3॥

ततोऽस्य प्रह्लादः समजनि सुतो गर्भ वसतौ
मुनेर् वीणा पाणेर् अधिगत भवत्भक्ति महिमा ।
स वै जात्या दैत्यः शिशुरपि समेत्य त्वयि रतिं
गतस् त्वत् भक्तानाम् वरद पर मोदाहरणताम् ॥ ॥24-4॥

सुरारीणां हास्यं तव चरण दास्यं निज सुते
स दृष्ट्वा दुष्टात्मा गुरुभि रशिशिक्षच् चिरममुम् ।
गुरु प्रोक्तं चासौ इद मिद मभद्राय दृढ मिति
अपाकुर्वन् सर्वं तव चरण भक्त्यैव ववृधे ॥ ॥24-5॥

अधीतेषु श्रेष्ठं किमिति परिपृष्टेऽथ तनये
भवत् भक्तिं वर्याम् अभिगदति पर्याकुल धृतिः ।
गुरुभ्यो रोषित्वा सहज मतिरस्ये त्यभिविदन्
वधो पायान् अस्मिन् व्यतनुत भवत् पाद शरणे ॥ ॥24-6॥

स शूलै राविद्धः सुबहु मथितो दिग्गज गणैः
महा सर्पैर् दष्टो ऽप्यनशन गराहार विधुतः ।
गिरीन्द्रा वक्षिप्तोऽपि अहह! परमात्मन् अयि विभो
त्वयि न्यस्तात्मत्वात् किमपि न निपीडा मभजत ॥ ॥24-7॥

ततश् शङ्काविष्टः स पुन रतिदुष्टो ऽस्य जनकः
गुरूक्त्या तद्गेहे किल वरुण पाशैस् तमरुणत् ।
गुरोश्चा सान्निध्ये स पुन रनुगान् दैत्य तनयान्
भवत् भक्तेस् तत्त्वं परम मपि विज्ञान मशिषत् ॥ ॥24-8॥

पिता शृण्वन् बाल प्रकर मखिलं त्वत् स्तुतिपरं
रुषान्धः प्राहैनं कुल हतक कस्ते बलमिति ।
बलं मे वैकुण्ठस् तव च जगताञ् चापि स बलं
स एव त्रैलोक्यं सकल मिति धीरोऽय मगदीत् ॥ ॥24-9॥

अरे क्वासौ क्वासौ सकल जगदात्मा हरि रिति
प्रभिन्ते स्म स्तंभं चलित करवालो दिति सुतः ।
अतः पश्चात् विष्णो न हि वदितु मीशोऽस्मि सहसा
कृपात्मन् विश्वात्मन् पवनपुर वासिन् मृडय माम् ॥ ॥24-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥